# मुक्तस्वाध्यायपीठम्

(Institute of Open & Distance Education)

# केन्द्रीयसंस्कृतविश्वविद्यालयः

५६-५७, इन्स्टीट्यूशनल एरिया, जनकपुरी,
नवदेहली-११० ०५८

## शास्त्रीसेतुः, द्वितीयपत्रम्

## प्रदत्तकार्यम् (Assignment)

**2022-23**

पत्रम् – .................................................................. विषयः – ..............................................................................

अध्येतुः नाम – ........................................................ पञ्जीकरणसंख्या – ..............................................................

अध्येतुः कृते एतत्पुस्तिकाप्रेषणदिनाङ्कः – ...........................................................................................

अध्येत्रा उत्तराणि विलिख्य एतत्पुस्तिकाप्रत्यर्पणदिनाङ्कः – ...........................................................................

अध्येतुः हस्ताक्षरम्

---

मूल्याङ्कनकर्तुः नाम ..........................................................................................................

मूल्याङ्कनकर्त्रा एतत्पुस्तिकाप्राप्तिदिनाङ्कः ..........................................................................................

मूल्याङ्कनकर्त्रा मूल्याङ्कनानन्तरं संस्थाने समर्पणदिनाङ्कः ..............................................................................

अध्येत्रा प्राप्ताङ्काः

| खण्डाः | निर्धारिताङ्काः | प्राप्ताङ्काः |
|---|---|---|
| खण्डः – क | 20 x 02 = 40 अङ्काः | |
| खण्डः – ख | 05 x 08 = 40 अङ्काः | |
| खण्डः – ग | 02 x 10 = 20 अङ्काः | |
| | पूर्णाङ्काः – 100 | प्राप्ताङ्काः – |

मूल्याङ्कनपुरस्सरं परामर्शैः सह अध्येतुः कृते एतत्पुस्तिकायाः पुनःप्रेषणदिनाङ्कः – ................................

मूल्याङ्कनकर्तुः हस्ताक्षरम्

स्थानम् ..............................

दिनाङ्कः ..............................

अध्येतुः कृते परामर्शाः,

प्रिय अध्येतः ! भवता/भवत्या पूरितं प्रदत्तकार्यम् अवलोकितम्। मूल्याङ्कनं कृतम्। मूल्याङ्कनस्य आधारेण कुत्र कुत्र भवदीयः दोषः/लोपः/विस्मृतिः/भ्रान्तिः अभवत् इति ज्ञात्वा स्वाध्यायं पुनः प्रवर्तयतु। शुभकामनाः।।

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

........................................................................................................................................

मूल्याङ्कनकर्तुः हस्ताक्षरम्

दिनाङ्कः ............................

# शास्त्री सेतुः - द्वितीयपत्रम्

## <u>खण्डः - क</u>

**i. अधोलिखितानां पदानाम् अन्त्यवर्णं लिखत-** **अङ्काः**-1x5=5

क. चन्द्रमा ख. सूर्यः ग. नक्षत्रम् घ. हरि

**ii. अधोनिर्दिष्टानां पदानां प्रातिपदकं लिखत-** **अङ्काः**-1x5=5

क. चन्द्रमा ख. माता ग. रामः घ. तपस्विन्

**iii. अधोनिर्दिष्टानां पदानां यथानिर्देशं रूपाणि लिखत-** **अङ्काः**-1x5=5

1. चन्द्रमा- द्वितीया बहुवचनम्
2. राजा- प्रथमा बहुवचनम्
3. राम- तृतीया एकवचनम्
4. हरि- चतुर्थी एकवचनम्
5. वपु- तृतीया एकवचनम्

**iv. अधोनिर्दिष्टानां पदानां यथानिर्देशं रूपाणि लिखत-** **अङ्काः**-1x5=5

1. नदी स्त्रीलिंग - द्वितीया बहुवचनम्
2. मति स्त्रीलिंग - प्रथमा बहुवचनम्
3. कवि पुंलिंग - चतुर्थी एकवचनम्
4. धेनु स्त्रीलिंग - सप्तमी एकवचनम्
5. सरित् स्त्रीलिंग - तृतीया एकवचनम्

**v. कोष्ठके प्रदत्त-धातोः लटि रूपेण रिक्तस्थानानि पूरयत-** **अङ्काः**-1x5=5

1. …………..रोचते भक्तिः। (हरेः/हरये/हरौ)
2. ………….बालः बिभति। (माता/मात्रा/मातुः)
3. सः……………. खादति।(अन्नेन/अन्नम्/अन्नस्य)
4. बालकः ………….लिखति। (लेखन्या/लेखनिम्/लेखनी।
5. गुरु …………… अध्यापयति। (शिष्येण/शिष्यम्/शिष्ये)

**vi. रिक्तस्थानानि पूरयत-** **अङ्काः-1x5=5**

1. छात्राः देवम् ……………..। (प्र+नम्)
2. इन्द्रः अप्सरसं………….। अभि+नन्द
3. अध्यापकः पुस्तकं……….। प्र+दृश्)

4. छात्राः विद्यालये ……….।अधि+तिष्ठ्)

5. राजा मन्त्रिणा सह …………….। (वि+मृश्)

**vii. यथानिर्देशं वाक्यानि परिवर्तयत-** **अङ्का:-**1x10=10

1. कृषिकः क्षेत्रं प्रकर्षति| (कर्मणि)
2. गृहिण्या दीपाः प्रज्वालयन्ते। (कर्तरि)
3. भक्तः देवं प्रणमति। (कर्मणि)
4. नृपः राज्यं प्रददाति। (कर्मणि)
5. भृत्येन भारः उदनीयत। (कर्तरि)
6. नायकः खलनायकं पराकरोति। (कर्मणि)
7. बालिकया पेटिका उदघाट्यत। (कर्तरि)
8. शिक्षकः कृष्णफलकं सम्मार्जयति। (कर्मणि)
9. मात्रा दीपः प्रज्वाल्यते। (कर्तरि)
10. पुत्रेण जनकः अन्वगम्यत। (कर्तरि)

## <u>खण्ड: - ख</u>

**viii. विशेष्यानुगुणं विशेषणं लिखत-** **अङ्का:-1x5=5**

1. ……………… गङ्गाजलम् आनयति। (पवित्र)
2. ……………….फलानि आनयन्तु। (पक्व)
3. ………………जले स्नानं कुर्वन्ति। (स्वच्छ)
4. ………………गगने नक्षत्राणि शोभन्ते। (निर्मल)
5. …………….. वृक्षेषु वानराः वसन्ति। (उन्नत)

**ix. विशेष्यपदं चित्वा रिक्तस्थानानि पूरयत-** **अङ्का:-**1x5=5

1. दीर्घां …………….पठामि। (कथां/कथे/कथाः)
2. शीतले …………स्नानं कुर्मः। (जलं/जले/जलाय)
3. तपोवनानि ………….आसन्। (सुन्दरम्/सुन्दराय/सुन्दराणि)
4. संस्कृतं …………..... अस्ति। (सरलम्/सरले/सरलाय)
5. योजनाः ………….भवन्ति। (नुतनाः/नुतनम्/नुतनाय)

**x. मञ्जुषातः पदानि चित्वा रिक्तस्थानानि पूरयत-** **अङ्का:-**1x5=5

| कौचित्, केनचित्, कस्मिंश्चित्, कस्यचित्, केषुचित् |
|---|

1. ……………… बालकौ पठतः।

2. ……………… दण्डेन चलति।

3. ……….. बालकस्य स्यूतः वर्तते।

4. …………………. उटजे वसति।

5. ……………….. उटजेषु वसति।

**xi. श्लोकं पठित्वा पञ्च अव्ययपदानि चिनुत-** **अङ्का**:-5x2=10

1. यदा यदा हि धर्मस्य ग्लानिर्भवति भारत।
   अभ्युत्थानमधर्मस्य तदात्मानं सृज्याम्यहम्॥

2. यत्करोषि यदश्नासि यज्जुहोसि ददासि यत्।
   यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम्॥

**xii. अधोनिर्दिष्टेषु वाक्येषु पूरणप्रत्ययान्तरूपैः रिक्तस्थानानि पूरयत-** **अङ्का:**-1x5=5

1. दशरथस्य पुत्रेषु लक्ष्मणः ……………..।

2. छात्रेषु रामः……………… अस्ति।

3. दशरथस्य राज्ञीषु कौसल्यायाः स्थानम्………..।

4. पाण्डुपुत्रेषु भीमः ………………..।

5. उपस्थितासु बालिकासु सुबोधायाः स्थानम्…………..।

**xiii. रेखांकित-क्रियापदानि शत्रन्तरूपेषु परिवर्तयत-** **अङ्का:**-1x5=5

1. रामः खादति गच्छति।

2. बालकः पठति स्मरति ।

3. वृद्धः हसति चलति ।.

4. गुरुः स्मरति बोधयति ।

5. कविः चिन्तयति लिखति ।

**xiv. रेखांकित- क्रियापदानि-शानजन्तेन रूपेण परिवर्तयत-** **अङ्का:**-1x5=5

1. शिष्यं विलोक्य गुरुः मोदते अस्ति।

2. भवतां भक्तिः प्रतिदिनम् एधते वर्तते।

3. सभा वर्धते अस्ति।

4. रामलक्ष्मणौ जायेतौ वर्तेते।

5. सभायां तिष्ठन्ते जनाः ओम् इति उक्तवन्तः।

## खण्डः - ग

**सर्वे प्रश्नाः यथानिर्देशं समाधेयाः-** **5x4=20**

**xv.** **अधोलिखितं श्लोकं पठित्वा उत्तराणि लिखत-** **अङ्काः**-1x5=5

**चित्रकूटं गते रामे पुत्रशोकातुरस्तथा।**
**राजा दशरथः स्वर्गं जगाम विलपन् सुतम्॥**

1. कः राजा जगाम ?
2. राजा दशरथः कुत्र जगाम ?
3. कीदृशः राजा दशरथः स्वर्ग जगाम ?
4. राजा दशरथः किं कुर्वन् स्वर्गं जगाम ?
5. दशरथः कदा स्वर्गं जगाम ?

**xvi.** **अधोलिखितं श्लोकं पठित्वा भावार्थं लिखत-** **अङ्काः**-1x5=5

दुर्जनः परिहर्तव्यः विद्ययाऽलङ्कृतोऽपि सन्।
मणिना भूषितः सर्पः किमसौ न भयङ्करः॥

**xvii.** **अधोलिखितं पद्यं पठित्वा द्वितीयाविभक्तेः पदानि लिखत-** **अङ्काः**-1x5=5

विना वेदं विना गीतां विना रामायणीं कथाम्।
विना कविं कालिदासं भारतं भारतं नहि॥

**xviii.** **अधोलिखितं गद्यांशं पठित्वा उत्तराणि लिखत-** **अङ्काः**-1x5=5

श्रीजगन्नाथदेवस्य रथयात्रा विश्वप्रसिद्धा अस्ति। एषा यात्रा प्रतिवर्षम् आषाढे मासे, पुरुषोत्तमक्षेत्रे चलति। अस्यां यात्रायां भागं ग्रहीतुं भारतवर्षस्य विभिन्नेभ्यः प्रदेशेभ्यः विदेशेभ्यः च अनेके भक्ताः पर्यटकाः च पुरीम् आगच्छन्ति। ते पुरीम् आगत्य त्रिषु रथेषु जगन्नाथ, बलभद्रं सुभद्रां च दृष्ट्वा धन्याः भवन्ति। अस्माकं भारतीयपरम्परायाम् एवं प्रसिद्धिः अस्ति यत् " रथस्थस्य जगन्नाथस्य दर्शनात् पुनर्जन्म न भवति" इति। अस्माकं भारतीयानां जगन्नाथ-बलभद्रयोः सुभद्रायां च महती श्रद्धा अस्ति। वयं तेषु, अन्येषु देवेषु देवतासु च पूर्णरूपेण विश्वसिमः। पुरुषोत्तमक्षेत्रस्य समीपे गुण्डिचामन्दिरम् अस्ति। देवी गुण्डिचा जगन्नाथस्य मातृष्वसा भवति। त्रयाणां देवानां रथाः सिंहद्वारात् आरभ्य गुण्डिचामन्दिरं यावत् गच्छन्ति। देव्याः सुभद्रायाः रथः अग्रजयोः रथयोः मध्ये चलति। नवदिनानि यावत् एते त्रयः गुण्डिचामन्दिरे तिष्ठन्ति। तत्र गत्वा भक्ताः देवानां दर्शनं कुर्वन्ति। भजनं कीर्तनं च कुर्वन्ति। रथयात्रायाः पूर्वं पुर्याः गजपतिराजः त्रिषु रथेषु गत्वा सुवर्णसम्मार्जन्या रथान् परिष्करोति। अनन्तरं तेषु सुगन्धजलं सिञ्चति। भक्ताः "जयतु जगन्नाथः" इति उक्त्वा रथस्य रज्जुं कर्षन्ति। न केवलं जगन्नाथस्य, अपि तु भारतवर्षे अन्येषां देवानाम् अपि रथयात्राः भवन्ति।

1. श्रीजगन्नाथदेवस्य रथयात्रा प्रतिवर्षं कदा भवति?
2. रथस्थस्य जगन्नाथस्य दर्शनात् किं न भवति?

3. देवी गुण्डिचा कस्य मातृष्वसा ?
4. कस्य रथयात्रा विश्वप्रसिद्धा अस्ति ?
5. भक्ताः किम् उक्त्वा रथस्य रज्जुं कर्षन्ति ।

❀ ❀ ❀

| | |
|---|---|
| Filename: | Shastri bridge 2nd paper |
| Directory: | C:\Users\msp\Documents |
| Template: | C:\Users\msp\AppData\Roaming\Microsoft\Templates\Normal.dotm |
| Title: | |
| Subject: | |
| Author: | USER |
| Keywords: | |
| Comments: | |
| Creation Date: | 3/13/2020 3:35:00 PM |
| Change Number: | 82 |
| Last Saved On: | 11/26/2023 2:51:00 PM |
| Last Saved By: | msp |
| Total Editing Time: | 193 Minutes |
| Last Printed On: | 11/26/2023 2:51:00 PM |
| As of Last Complete Printing | |
| Number of Pages: | 7 |
| Number of Words: | 1,631 (approx.) |
| Number of Characters: | 9,303 (approx.) |